दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

■ पृष्ठ-4 ■ वर्ष-4 ■ अङ्क-36

1

दिसम्बर 6, 2024

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## पञ्चाङ्गम्

अद्य कालयुक्तः वि.सं. २०८१, कलियुगाब्धः ५१२५ हेमन्तऋतुः सूर्यदक्षिणायनम् मार्गशीर्षशुक्लपञ्चमी तिथिः मार्गशीर्ष २१ प्रविष्टांशः मङ्गलमयः भवेत्


2 मुख्यमंत्री सुखविन्दरसिंहसुक्खुः संवेदनशीलतां प्रदर्शितवान्, मञ्चात् अवतीर्य



3 वर्षायै मातुः श्रीनयनादेव्याः चरणयोः स्थापिता भगवतः वीरभद्रस्य पिंडिका



4 रामायणकथा (चतुश्चत्वारिंशः सर्गः) गृध्रोलूकयोः व्यवहारः(द्वितीयः खण्डः)



## भारतस्य विकसितराष्ट्रस्य निर्माणे कृषिः प्रमुखा अस्ति- राष्ट्रपतिः द्रौपदी मुर्मुः



राष्ट्रपतिः द्रौपदी मुर्मुः प्रोक्तवती यत्, सप्तचत्वारिंशदधिक द्विसहस्र तमवर्षपर्यन्तं भारतस्य विकसितराष्ट्रस्य निर्माणे कृषिः प्रमुखा अस्ति। सा अनुकूलजलवायुः, कुशलकार्यबलं, उर्वरकभूमिः, उन्नतप्रौद्योगिकी च इत्यादीनां माध्यमेन कृषिउत्पादनं इतोप्यधिकं वर्धयितुं क्षमतां भारतस्य प्रकाशितवती। राष्ट्रपति मुर्मुः भुवनेश्वरनगरेकृषिप्रौद्योगिकीविश्वविद्यालयस्य चत्वारिंशत्तमे दीक्षांतसमारोहे प्रवदन्ती आसीत्।

## दिल्ल्यां, राष्ट्रियराजधानि-क्षेत्रे च रात्रौ प्रातश्च धूमाच्छादनं संभाव्यते



दिल्ल्यां वायु-गुणवत्तायां परिष्करणं निरन्तरं प्रचलति। गतदिने (AQI) इति वायु-गुणवत्ता-सूचकांकः एकषष्ट्यधिकैकशतम् आसीत्, यः सूचकाङ्कस्य मध्यमश्रेण्याम् अस्ति । केन्द्रीय-प्रदूषण नियन्त्रण-विभागस्य अनुसारं, नगरस्य केषुचित् क्षेत्रेषु वायु-गुणवत्ता- सूचकांकस्य स्तरः द्विशतं अत्यक्रामत् । दिल्ल्याः शादीपुर-स्थानके वायु-गुणवत्ता-सूचकांकः चतुर्पञ्चाशदधिक-द्विशतं, मुंडकायां चतुर्विंशत्यधिक-द्विशतं, नेहरू नगरे सप्तत्रिंशदधिक-द्विशतं,जहांगीरपुरीक्षेत्रे अष्टोत्तर-द्विशतं, आर. के. पुरम् इत्यत्र च एकोत्तरद्विशतं संसूचितः। भारतीय-ऋतुविज्ञान-विभागेन (IMD) इत्यनेन पूर्वानुमानं व्यक्तीकृतम् अस्ति यत् आगामि दिवसद्वयोः दिल्ल्यां, राष्ट्रियराजधानि-क्षेत्रे च रात्रौ प्रातश्च समये धूमाच्छादनं संभाव्यते ।

## पीएसएलवी सी-59 इति प्रक्षेपण-यानस्य सफलतापूर्वकं प्रक्षेपणं सम्पन्नम्



भारतीय-अंतरिक्ष-अनुसंधान संगठनम् (इसरो) इत्यनेन श्रीहरिकोटायाः सतीश-धवन-केंद्रे पीएसएलवी सी-59 इति प्रक्षेपण-यानस्य सफलतापूर्वकं प्रक्षेपणं कृतमस्ति। अनेन प्रक्षेपणयानेन श्रीहरिकोटायां स्पेसपोर्ट इत्यत्र प्रक्षेपणस्थलात् सायं चतुरधिक-चतुर्वादने उड्डयनं समारभत्। प्रक्षेपणस्य अनन्तरं, इसरो इत्यनेन एक्स्-इति सार्वजनिक-संदेशपटले प्रोक्तं यत्, पीएसएलवी-सी59 इत्यनेन सफलतापूर्वकं आकाशे प्रयाणं कृतमस्ति, येन इसरो इत्यस्य तान्त्रिक्या विशेषज्ञतया सह यूरोपीय अंतरिक्ष-संगठनस्य प्रोबा-3 उपग्रहाणां स्थापनाय न्यूस्पेस-इंडिया-लिमिटेड इत्यस्य नेतृत्वे एकस्य वै श्विकाभियानस्य समारम्भम् अभवत्। अवधेयं यत् प्रोबा 3 यूरोपीय-अंतरिक्ष-संगठनस्य प्रदर्शनाभियानम् अस्ति। अस्मिन् अभियाने द्वयंतरिक्षयाने सम्मिलिते स्तः, ये युगपदेव कक्षायां संस्थापयिष्येते।

## भाजपा इति दलस्य वरिष्ठ नेता देवेन्द्रफडनवीसः तृतीयवारं महाराष्ट्रस्य मुख्यमन्त्रित्वेन शपथग्रहणं स्वीकृतवान्



प्रधानमन्त्री नरेन्द्रमोदी, वरिष्ठ केन्द्रीय मन्त्रिणाः, मुख्यमन्त्रिणाः, अन्ये च गणमान्याः उपस्थिताः आसन्।

भाजपा इति दलस्य वरिष्ठ नेता देवेन्द्रफडनवीसः गतसायं तृतीयवारं महाराष्ट्रस्य मुख्यमन्त्रित्वेन शपथग्रहणं स्वीकृतवान्। भाजपा दलस्य नेतृत्वे महायुतिग्रन्थिबन्धनेन महाराष्ट्रस्य विधानसभा निर्वाचने त्रिंशदुत्तर द्विशतं निर्वाचनासनानि विजितानि आसन्। भाजपा दलेन सह शिवसेना, राष्ट्रवादीकांग्रेस दलं च महायुतौ सम्मिलिताः सन्ति।शपथग्रहण समारोहे

## दिल्ली-मेट्रो-रेलयानस्य सिग्नलिंग केबल इत्यस्य चौर्येण ब्लू-लाईन-मैट्रो रेलयानसेवाः प्रभाविता



दिल्ली-मेट्रो-रेलयानस्य सिग्नलिंग केबल इत्यस्य चौर्येण ब्लू-लाईन-मैट्रो रेलयानसेवाः सीमितवेगेन प्रचलन्ति । दिल्ली-मेट्रो रेल-निगमेन प्रोक्तं यत् द्वारका सैक्टर-एकविंशति-तः नोयडा-इलेक्ट्रानिक-सिटी-वैशालीस्थानक-पर्यन्तं मेट्रो रेलमार्गः प्रभावितः अभवत् यतः केचिद्भिः उपद्रविभिः मोती-नगर-कीर्ति-नगर-मेट्रो-स्थानकयोः मध्ये केबल इत्यस्य हानिः कृता । अस्मिन् खण्डे रेलयानानि विनियमितानि भवन्ति, येन रेलयानानां सम्मर्दः जातः, सेवायां च विलम्बः अभवत् । डी. एम्. आर्. सी. इत्यनेन आश्वस्तिः यत् ब्लू-लाईन् इत्यस्य शेषभागेषु रेलयानसेवाः ससामान्यं उपलभ्यन्ते। दिवसावधौ जनानाम् सौविध्याय राजस्वसेवायाः पिधानानन्तरं रात्र्यावधौ आवश्यकं पुनर्निर्माणकार्यं निर्धारितम् अस्ति ।

## सुभाषितम्

**पातितोऽपि कराघातै-**
**रुत्पतत्येव कन्दुकः।**
**प्रायेण साधुवृत्तानाम-**
**स्थायिन्यो विपत्तयः॥**

भावार्थः:- हाथ से फेंकी हुई गेंद भी भूमि पर गिरने के बाद ऊपर की ओर उठती है, सज्जनों का बुरा समय थोड़े समय के लिए ही होता है।

प्रतिदिनं नवीनतमं हिमसंस्कृतवार्ताः दैनिकवार्तापत्रं प्राप्त्यर्थं 7876636263 Watsapp संख्या मध्ये नमो नमः लिखन्तु

To get the latest himsanskritvartah Daily Sanskrit Newspaper every day, write Hello on 7876636263 Watsapp number

**सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति**

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## व्लादिमीर पुतिनेन भारते लघु-मध्यमोद्यमानां स्थितिं सुदृढं कर्तुं प्रशंसा कृता



रूसस्य राष्ट्रपतिना व्लादिमीर पुतिनेन भारते लघु-मध्यमोद्यमानां स्थितिं सुदृढं कर्तुं प्रधानमन्त्रिणः नरेन्द्र-मोदिनः नेतृत्वभूतस्य सर्वकारस्य प्रशंसा कृता अस्ति । परह्यः मॉस्को-नगरे एकं निवेश-मंचं संबोधयन् श्री-पुतिनः रूसस्य आयात प्रतिस्थापन-कार्यक्रमेण सह अस्य समानतां प्रतिपादयन् प्रावोचत् यत् भारतेन सविशेषं मेक इन इंडिया इत्यस्मै महत्वं प्रदत्तम् । राष्ट्रपतिना पुतिनेन प्रोक्तं यत् भारतस्य नेतृत्वेन नीतिगतरूपेण स्वहितानां प्राथमिकतायां ध्यानं केन्द्रितं कृतम् सहैव तेन भारते विनिर्माण-संचालनं स्थापितं कर्तुं रूसस्य तत्परता अपि व्यक्तीकृता । श्रीपुतिनेन लघु-मध्यमोद्यमानां विकासाय ब्रिक्स्-देशानां मध्ये पारस्परिक सहयोगं सम्वर्धनार्थम् अपि आह्वानं कृतम् ।

# CM Sukhu: मुख्यमंत्री सुखविन्दरसिंहसुक्खुः संवेदनशीलतां प्रदर्शितवान्, मञ्चात् अवतीर्य दिव्यांगक्रीडिकायै सम्मानम् अयच्छत्



हिमसंस्कृतवार्ताः - शिमला। अन्ताराष्ट्रीयपदकविजेतृणां क्रीड़कानां अभिनन्दनकार्यक्रमे मुख्यमंत्री सुखविन्दरसिंहसुक्खुः पुनः एकवारं संवेदनशीलतां प्रदर्शितवान्। यदा मञ्चे सर्वे क्रीडकाः एकैकशः क्रीडकानां सम्मानार्थं आहूताः आसन् तदा तावत् चक्रासन्दे उपविष्टायाः बोशिया-क्रीडिका अञ्जलिदेवी इत्यस्याः नाम आहूयते स्म।यदा मुख्यमन्त्री दृष्टवान् यत् चक्रासन्दे उपविष्टा क्रीडिका मञ्चे आगन्तुं न शक्नोति तदा सः संवेदनशीलतां दर्शयित्वा मञ्चे स्थितानां गणमान्यजनानां मञ्चात् अवतरितुं संकेतं दत्तवान्, सः च स्वयमेव उपक्रमं कृत्वा मञ्चात् अवतरितवान्। मुख्यमंत्री मञ्चात् अवतीर्य तस्याः स्थाने पैराएथलीट अञ्जलिं सम्मानितवान्। सः स्वयमेव बोशिया- पैरा- क्रीडक- अञ्जलिदेवी इत्यस्याः समीपं गत्वा तस्याः कृते हिमाचलीटोपी- शालसहितं त्रिलक्षरूप्यकाणां राशिः चेकमाध्यमेन च प्रदत्तवान्। मुख्यमन्त्रिणः एतत् पदं दृष्ट्वा सम्पूर्णं पण्डालम् उच्चैः तालीवादनेन उद्भूतम्।

## हिमाचले २२ उद्योगाः अनुमोदिताः, ९२१ जनाः जीविकां प्राप्स्यन्ति



हिमसंस्कृतवार्ताः - शिमला। हिमाचलप्रदेशे औद्योगिकविकासयोजनायाः अन्तर्गतं राज्यस्तरीयसमित्या उद्योगाः, संयंत्राणि, यन्त्राणि च स्थापयितुं २२ आवेदनानि अनुमोदितानि सन्ति। अस्मिन् संयंत्रेषु यन्त्रेषु च १३२.१२ कोटिरूप्यकाणां निवेशः भविष्यति, ९२१ जनाः च रोजगारं प्राप्स्यन्ति। औद्योगिकविकासयोजनायाः अन्तर्गतं बुधवासरे प्रधानसचिवस्य (उद्योगस्य) आरडीनजीमस्य अध्यक्षतायां गोष्ठ्यां उक्तं यत् योजना तेषु एककेषु प्रयोज्या अस्ति, येषां स्थापना २०१७ तमस्य वर्षस्य अप्रैल-मासस्य प्रथमदिनात् २०२२ तमस्य वर्षस्य मार्चमासस्य ३१ दिनाङ्कपर्यन्तं वा पर्याप्तरूपेण विस्तारिता अस्ति वा। आर. डी. नजीमः अवदत् यत् एतेषु प्रकरणेषु कुलसहायताराशिः २१.४० कोटिरूप्यकाणि इति अनुमानितम् अस्ति। एते प्रकरणाः शीघ्रमेव धनप्रदानार्थं केन्द्रसर्वकाराय प्रेषिताः भविष्यन्ति। सः अवदत् यत् अस्याः योजनायाः अन्तर्गतम् औद्योगिक-एककानां कृते प्लाण्ट-यन्त्रेषु निवेशार्थं ३० प्रतिशतं दरेण केन्द्रीय-पूञ्जीनिवेश- प्रोत्साहनं प्रदत्तं भविष्यति, यस्य उच्चसीमा ५ कोटिरूप्यकाणां भवति। गोष्ठ्यां उद्योगनिदेशकः डॉ. युनुसः, प्रबंधनिदेशकः एचपीएसआईडीसी राजेश्वरगोयलः, राज्यस्तरीय- बैंकर- समितिः संयोजकः, पर्यटनं, वित्त एवं उद्योगविभागस्य अन्ये वरिष्ठाधिकारिणः उपस्थिता अभवन्।


## कांगड़ायाः सर्वाणि शक्तिपीठानि वंदेभारतरेलयानेन सम्बद्धानि भवेयुः



हिमसंस्कृतवार्ताः - धर्मशाला।काङ्गड़ासंसदीयक्षेत्रस्य सांसदः डॉ. राजीवः भारद्वाजः संसदि रेलसंशोधनविधेयकं २०२४ विषये वदन् काङ्गड़ामण्डलस्य सर्वाणि शक्तिपीठानि वंदेभारतरेलयानेन सह सम्बद्धानि भवेयुः इति आग्रहं कृतवान्। विधेयकस्य समर्थने वदन् सः अवदत् यत् सम्प्रति वन्देभारत-रेलयानं दिल्लीतः अम्ब- अन्दौरापर्यन्तं गच्छति, केवलम् एकं पर्वतं खनित्वा काङ्गड़ामण्डलस्य अन्यानि धार्मिकस्थानानि बृजवेश्वरीदेवी, ज्वालाजी, चामुण्डादेवी एतानि शक्तिपीठानि च वन्देभारतरेलयानेन सह सम्बद्धानि भविष्यन्ति। एतेन देशस्य विदेशेभ्यः च भक्तानां पर्यटकानां च सुविधा भविष्यति। लोकसभायां वदन् सः अवदत् यत् धर्मशाला अन्ताराष्ट्रीय- पर्यटनस्थलं यत्र तिब्बतीधर्मनेता दलाईलामा निवसति, एतदतिरिक्तं डलसरोवरः इत्यादीनि पर्यटनस्थानानि सन्ति यत्र विश्वस्य सर्वेभ्यः जनाः भ्रमणार्थम् आगच्छन्ति। धर्मशालापर्यन्तं वंदेभारतरेलयानस्य चालनेन क्षेत्रं समृद्धं भविष्यति, रोजगारस्य अवसराः च वर्धन्ते इति उक्तवान्। सः अवदत् यत् काङ्गड़ामण्डलं सम्बद्धीकरोति एकमात्ररेलमार्गः अधिकतया बाधितः भवति। अतः एतद् पठानकोट- जोगिन्दरनगर-रेलमार्गं व्यापकमापकं कर्तुमपि आग्रहं कृतवान्। अस्य रेलमार्गस्य व्यापकमापनार्थम् अन्तिमभौतिकसर्वेक्षणस्य केन्द्रसर्वकारस्य निर्णयस्य स्वागतं कृतवान्। सः अवदत् यत् डलहौजी, चम्बा, खज्जियार इत्यादीनि अन्ताराष्ट्रीयपर्यटनस्थानानि काङ्गड़ा लोकसभाक्षेत्रस्य अन्तर्गतानि आगच्छन्ति, चम्बा-करवस्त्रस्य, चौगानस्य, स्थालिकाः च विश्वप्रसिद्धाः सन्ति किन्तु इदं क्षेत्रम् अद्यापि रेलजालेन सह न सम्बद्धः इति अवदत्। सः आगामिनि रेलबजटे चम्बानगरं पठानकोटनगरेण रेलमार्गेण सम्बद्धं कर्तुं अनुरोधं कृतवान्।

# मुख्यमन्त्रीसुक्खुः अन्ताराष्ट्रीयपदकविजेतॄणां क्रीडकानां सम्मानं कृतवान्, उक्तवान् च- "वयं "स्पोर्ट्स कॉम्प्लेक्स" इत्यस्य निर्माणं करिष्यामः





हिमसंस्कृतवार्ताः- शिवा शर्मा/डॉ पद्मनाभः। हिमाचलप्रदेशस्य मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः गुरुवासरे भव्यसमारोहे २१ अन्ताराष्ट्रीयपदकविजेतृभ्यः १४.७७ कोटिरूप्यकाणां पुरस्कारधनराशिना पुरस्कृतवान्। असौ ऊनामण्डलस्य निषादकुमाराय ७.८० कोटिरूप्यकाणां पुरस्कारधनराशिं प्रदत्तवान्। निषादः 2022 तमे वर्षे टोक्यो– पैरालिम्पिकक्रीडासु रजतपदकं, 2024 तमे वर्षे पेरिस– पैरालिम्पिकक्रीडासु रजतपदकं, 2023 तमे वर्षे चीनदेशे पैराएशियनक्रीडासु स्वर्णपदकं, 2022 तमे वर्षे पुर्तगाले विश्वक्रीडासु रजतपदकं च प्राप्तवान् आसीत्। मुख्यमन्त्री मण्डीजनपदस्य अजयकुमाराय २.५० कोटिरूप्यकाणां पुरस्कारराशिं प्रदत्तवान्। अजयकुमारः 2023 तमे वर्षे चीनदेशे पैराएशियनक्रीडासु रजतपदकं प्राप्तवान्। सिरमौरमण्डलस्य कबड्डीक्रीडिकायै ऋतुनेगी इत्यस्यै अपि मुख्यमन्त्रिणा पुरस्कारराशिः प्रदत्ता। ऋतुनेगी 2023 तमे वर्षे चीनदेशे पैरा– एशियनक्रीडासु भारतीयकबड्डी-दलस्य प्रतिनिधित्वेन स्वर्णपदकम् अर्जितवआसीत्।

### अन्ताराष्ट्रीयक्रीडकानां सम्मानम्

मुख्यमन्त्रिणा सुखविन्द्रेण सुक्खुणा गुरुवासरे शिमलायां आयोजिते नकद-पुरस्कार-वितरण-समारोहे अंतर्राष्ट्रीय पदक-विजेतारः एकविंशतिः क्रीडकाः सम्मानिताः। ओलम्पिक, पैरालम्पिक, एशियाड, कॉमनवेल्थ- प्रतियोगितासु विजयं प्राप्य क्रीड़ाः धनराश्या पुरस्कृताः। ऊनायाः पैरालम्पिक-एथलीट-निषादकुमाराय सर्वाधिकं ७.७० कोटिरूप्यकाणां पुरस्कारराशिः दत्ता।समारोहे स्वे भाषणे मुख्यमन्त्रिणा उक्तं यत् कांग्रेससर्वकारस्य कालः यदा प्रारब्धः तदा प्रदेशस्य कोषः रिक्तः आसीत्।पर्वसर्वकारेण प्रदेशसम्पदः विनष्टाः। अस्माभिः व्यवस्था परिवर्तनं कृत्वा आत्मनिर्भरं प्रदेशं निर्मीयते। यत् क्रीडकाः सम्मानं प्राप्नुवन्ति, तत् आत्मनिर्भर-हिमाचलस्य कल्पनायाः साकाररूपं वर्तते। मुख्यमन्त्रिणा उक्तं यत् पुरस्कारराशिः अष्टगुणितं वर्धिता। क्रीडकाः विदेशं गत्वा देशस्य यशः वृद्धिं कुर्वन्ति तदा प्रदेशस्यापि कीर्तिः वर्धते। क्रीडकान् अस्माकं सर्वकारः प्रणमति। विद्यालय-खेलक्रीडायाः भोज्य राशिः, महाविद्यालय-क्रीडायाः तथा राष्ट्रीयस्तरक्रीडायाः अपि भोज्यराशिः वर्धिता।मुख्यमन्त्रिणा उक्तं यत् हिमाचलप्रदेशे इंटीग्रेटेड स्पोर्ट्स कॉम्प्लेक्स निर्मीयते। अत्र अंताराष्ट्रीयस्तरस्य शूटिंग-रेंज,तरणकुंड , मुष्टिकाताडनक्रीडा, मल्लयुद्धम्, लॉन-टेनिस-कोर्ट इत्येतानि च स्थापितानि भविष्यन्ति । चतुर्षष्टिषु विधानसभासु एतेषां निर्माणकार्यं आगामि वर्षे प्रारभ्यते। एकस्मिन क्रीड़ा-परिसरे पञ्चाशत् कोटिः रूप्यकाणां व्ययः क्रियते

# वर्षायै मातुः श्रीनयनादेव्याः चरणयोः स्थापिता भगवतः वीरभद्रस्य पिंडिका

हिमसंस्कृतवार्ताः - श्रीनयनादेवी जी। हिमाचले मासद्वयं यावत् प्रचलति अनावृष्ट्याः आश्रयं वर्षायाः च कामनायै प्रसिद्धे शक्तिपीठे श्री नयनादेव्यां भगवतः वीरभद्रस्य पिण्डिका मातुः श्रीनयनादेव्याः चरणयोः स्थापिता। एषा परम्परा बहुवर्षेभ्यः प्रचलति। एतादृशः विश्वासः अस्ति यत् एतद् वृष्टेः प्रार्थनायै क्रियते। मन्दिरस्य पुरोहितानां मते यदा-यदा राज्ये दीर्घकालं यावत् वर्षा न भवति, अनावृष्टिः सदृशी स्थितिः च उत्पद्यते तदा-तदा भगवतः वीरभद्रस्य पिण्डिका मन्दिरे मातृदेव्याः चरणयोः विशेषतया स्थापिता भवति। मातृदेव्याः भगवतः वीरभद्रस्य च प्रसादेन वर्षा आगत्य अनावृष्टिः समाप्ता इति अस्य प्रयोजनम्। एषा परम्परा तेषां पूर्वपुरुषैः आरब्धा इति पुरोहिताः अवदन्। यदा-यदा चिरकालं वर्षा न भवति स्म तदा-तदा ते भगवतः वीरभद्रस्य पिण्डिकां मन्दिरस्य परितः प्रदक्षिणं कृत्वा बहिः मातुः श्रीनयनादेव्याः चरणयोः स्थापयन्ति स्म। कतिपयेभ्यः दिनेभ्यः अनन्तरं वर्षा आरभ्यते इति विश्वासः अस्ति। अद्यत्वे अपि एतादृशेनैव विश्वासेन परम्परा निरन्तरं प्रचलति।



## माता श्रीनयनादेवी वृष्टेः आशीर्वादं दद्यात्

गुरुवासरे अपि पुरोहिताः विशेषप्रार्थनाः कृत्वा माता श्री नयनादेवी शीघ्रमेव वृष्टेः आशीर्वादं दद्यात् इति प्रार्थितवन्तः। मन्दिरपुरोहितौ प्रवेशशर्मा, सुमितशर्मा च अवदतां यत् प्रतिवर्षं यदा अनावृष्टिः वर्धते, जलस्य अभावः च भवति तदा एषा धार्मिकपरम्परा क्षेत्रस्य जनानां कृते आशायाः किरणं भवति।

# त्रिदिवसीय अष्टलक्ष्मी महोत्सवस्य 2024 इत्यस्य आयोजनम् अद्यारभ्य भारतमंडपे आरभ्यते




हिमसंस्कृतवार्ताः प्रवीण कुमार। :अद्य नवदेहलीनगरस्य भारतमण्डपमे त्रिदिवसीयः अष्टलक्ष्मीमहोत्सवः २०२४ आयोजितः भविष्यति। अस्य महोत्सवस्य उद्घाटनं प्रधानमन्त्री नरेन्द्रमोदी करिष्यन्ति। आकाशवाणी- संवाददात्रेण उक्तं यत् महोत्सवे सांस्कृतिककार्यक्रमाः, शिल्पकलायाः च चलायमानप्रदर्शनानि, तकनीकीसत्रं, क्रेता-विक्रेता-समागमाः, निवेशसम्मेलनानि च आयोजितानि भविष्यन्ति।

## चलचित्रवार्ताः

# प्रियंका चोपड़ा ५ वर्षाणि पश्चाद् बॉलीवुडक्षेत्रे पुनः आगमिष्यति



हिमसंस्कृतवार्ताः - जगदीशडाभी (मुम्बई) प्रियंका चोपड़ा कदाचित् बॉलीवुडजगतः शीर्ष- अभिनेत्री आसीत्। परन्तु विगतेषु वर्षेषु सः एकम् अपि बॉलीवुड-चलच्चित्रं न कृतवती। प्रियङ्का निरन्तरं हॉलीवुड-चलच्चित्रं कुर्वती अस्ति किन्तु सा बॉलीवुडमध्ये न दृश्यते। तथापि अधुना प्रियङ्का चोपड़ा बॉलीवुडक्षेत्रे पुनरागमनं कर्तुं गच्छति। प्रियङ्का अन्तिमवारं २०१९ तमे वर्षे द स्काई इज पिङ्क इति चलच्चित्रे दृष्टा आसीत्। प्रियङ्का चोपड़ा अस्य चलच्चित्रस्य प्रदर्शनस्य पञ्चवर्षेभ्यः अनन्तरं बॉलीवुड-क्षेत्रे पुनरागमनं कर्तुं गच्छति। फरहान अख्तरस्य 'जी ले जरा' इति चलच्चित्रं विगतवर्षेषु वार्तायां वर्तते। अस्य चलच्चित्रस्य घोषणा २०२१ तमे वर्षे अभवत्। अस्मिन् चलच्चित्रे प्रियङ्कायाः सह आलिया भट्टः, कैटरीना कैफः च मुख्यभूमिकायां स्तः। केनचित् कारणेन अस्य चलच्चित्रस्य कार्यं न आरब्धम्। अधुना च एकस्मिन् वार्तालापे प्रियङ्का संकेतदतवती यत् सा यथाशीघ्रं बॉलीवुडक्षेत्रे-पुनरागमनं कर्तुं गच्छति इति। एसटी सिटी इत्यनेन सह वार्तालापे प्रियङ्का चोपड़ा अवदत् २०२५ तमे वर्षे बॉलीवुडक्षेत्रे- पुनरागमनस्य घोषणां कर्तुं गच्छति इति। अहं हास्यं न करोमि, अहम् अत्र बहवः चलच्चित्रनिर्मातारः मिलितवन्तः, बहवः पटकथाः अपि पठितवन्तः। अहं सक्रियरूपेण किमपि अन्वेषयामि यत् अहं हिन्दीभाषायां कर्तुम् इच्छामि। अस्मिन् वर्षे अहम् अतीव व्यस्तः अभवम्, परन्तु मम आश्चर्यम् अस्ति। तदनन्तरं यदा प्रियङ्का पृष्टा यत् सा 'जी ले जरा' इत्यस्य विषये किमपि संकेतं ददाति वा इति तदा सा अवदत्- भवद्भिः एतस्य विषये एक्सेल इत्यनेन सह वार्तालापः करणीयः।

# भारतं केवलं अन्य अर्थव्यवस्थानां कृते उपभोक्तृ-आपणं न भवितुम् इच्छति-जयशंकरः



विदेशमन्त्री डॉ. एस जयशंकरः अवदत् यत् भारतं केवलं अन्य अर्थव्यवस्थानां कृते उपभोक्तृ-आपणं न भवितुम् इच्छति। 'भारतस्य वैश्विक उत्थान-संवर्धनं' इत्यस्मिन् विषये नवदिल्ल्यां भारत ऐट 100 इति शिखरसम्मेलने सम्बोधयन् डॉ. जयशङ्करः अवदत् यत् वैश्विकसङ्कटनाः उद्योगाः च भारते न केवलं तस्य आपणार्थं अपितु तस्य प्रतिभायाः कृते अपि आगच्छन्ति। चीनविषये मन्त्री उक्तवान् यत् भारतं तेन सह स्वस्थव्यापारसम्बन्धः इच्छति परन्तु तस्य उपरि आश्रितः भवितुम् न इच्छति। रूसदेशात् आयातानां विषये प्रवदन् मन्त्री अवदत् यत् आस्ट्रेलिया, ब्राजील्, इन्डोनेशिया देशैः च सह यूरोपीयराष्ट्र प्राकृतिकसंसाधनानाम् कृते विश्वसनीयः सहभागी अस्ति, यस्य भारते अभावः अस्ति।

## सामान्यज्ञानम्

प्रश्नः 1. जगन्नाथमन्दिरं कुत्र अस्ति?
उत्तरम् : पुरी (उड़ीसाप्रान्ते)
प्रश्नः 2. 'नागानन्दम्' इत्यस्य रचयिता कः अस्ति?
उत्तरम् - कविः हर्षवर्धनः।
प्रश्नः 3. भारतस्य राष्ट्रीयध्वजः कः अस्ति?
उत्तरम् - 'तिरङ्गः त्रिवर्णः वा' **इति।**
प्रश्नः 4. भारते सर्वाधिकम् बृहत्तरम् वनं किम् अस्ति?
उत्तरम् - 'सुन्दरवनम्' (पश्चिम बंगालम्)
प्रश्नः 5. वर्तमानसमये भारतस्य स्वास्थ्यमन्त्री कः अस्ति?
उत्तरम् - श्रीमान् जगतप्रकाश नड्डा।

## संस्कृतज्ञानम्

प्रश्नः 1.शिव+ आलयः इति पदस्य सन्धिपदं किम्?
उत्तरम् - शिवालयः।
प्रश्नः 2. 'र' इत्यस्य उच्चारणस्थानं किम्?
उत्तरम् - दन्तः।
प्रश्नः 3. प्रतिगृहम् (गृहम् गृहम् प्रति) इत्यत्र कः समासः?
उत्तरम् - अव्ययीभावसमासः।
प्रश्नः 4. 'केषु' इत्यस्य पदपरिचयं देयम्।
उत्तरम् - पुल्लिङ्गः-नपुंसकलिङ्गः, किम् शब्दः सप्तमीविभक्तिः बहुवचनम्।
प्रश्नः 5. संस्कृते समयः '4:15' भवति-
उत्तरम् - सपाद चतुर्वादनम्।

हिमसंस्कृतवार्ताः, डॉ. विवेक शर्मा, जोगिन्द्रनगरम्

# व्याकरणचिन्तनम्

✍असमप्रदेशीयः नारदोपाध्यायः

| पुंसि - | स्त्रियाम्- | नपुंसि- |
|---|---|---|
| एकः छात्रः अस्ति। | एका बालिका अस्ति। | एकं मित्रम् अस्ति। |
| द्वौ बालकौ स्तः। | द्वे महिले स्तः। | द्वे फले स्तः। |
| त्रयः शिक्षकाः सन्ति। | तिस्रः नद्यः सन्ति। | त्रीणि पत्राणि सन्ति। |
| चत्वारः वेद्याः सन्ति। | चतस्रः गायिकाः सन्ति । | चत्वारि पुष्पाणि सन्ति। |
| पञ्च नराः सन्ति। | पञ्च युवतयः सन्ति। | पञ्च पुस्तकानि सन्ति। |
| (एवं षट्, सप्त, अष्ट, नव ) | (एवं षट्, सप्त, अष्ट, नव, ) | (एवं षट्, सप्त, अष्ट, नव, ) |

अवधातव्यं यत्, पञ्चतः नवदशपर्यन्तं त्रिषु लिङ्गेषु सङ्ख्याः समानाः, नित्यबहुवचनान्ताः भवन्ति। विंशतितः नवनवतिपर्यन्तं सर्वेऽपि सङ्ख्यावाचकशब्दाः एकवचनान्ताः स्त्रीलिङ्गाः च भवन्ति। शतम्- शब्दः नपुंसि/ पुंसि च भवति।
इति सङ्ख्याज्ञानम्।

# "लौकिकन्यायकोशः"(११०)
## "अनारभ्याधीतविधिन्यायः"

कमपि एकं विशिष्टं विषयम् अननुसृत्य प्रवर्तमानं विधानं यदा क्रियते तदा अस्य न्यायस्य प्रयोगः भवति। एतादृशानां सर्वेषामपि विधीनां प्रकृत्यर्थेन सह अन्वयः भवति। तैत्तिरीयसंहितायां (३- ५- ७- २) यस्य पर्णमयी न स पापं श्लोकं कृणोति इति एकं वाक्यं वर्तते। जुहूः (चमसः) पर्णमयी (पलाशवृक्षकाष्ठेन) भवति चेत् तस्मात् एकम् अपूर्वम् उत्पद्यते इति मीमांसकानां सिद्धान्तः। वाक्यम् इदं कस्मिन् अपि दर्शपूर्णयागाख्ये प्रकृतियागे विकृतियागे वा न संबध्यते। पूर्वः कोऽपि सम्बन्धः न वर्तत इति कारणेन 'अनारभ्याधीतम्' इति कथ्यते।

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**



हिमसंस्कृतवार्ता, ✍प्रदीपः
pradipnath997@gmail.com

# ।। श्रीरामायणकथा ।।

## (चतुश्चत्वारिंशः सर्गः)
### गृध्रोलूकयोः व्यवहारः(द्वितीयः खण्डः)

तस्मात् जानता सत्येन वक्तव्यम्। रामस्य तद् भाषितं श्रुत्वा सचिवाः रामम् अब्रुवन् हे राजन्! उलूकः शोभते न तु गृध्रः! हे महाराज! त्वं हि प्रमाणं यतः प्रजानां परमा गतिस्तु राजा हि भवति। राजानम् आश्रित्य प्रजाः वर्धन्ते, राजा हि धर्मः सनातनः। सचिवानां वचः श्रुत्वा राजा रामचन्द्रः अब्रवीत् - पुराणे यदुदाहृतं तदभिधास्यामि श्रूयताम्। पुराकाले सचराचरं त्रैलोक्यं सलिलेन परिप्लुतम् आसीत्। तदा केवलम् एक एव मेरुरिवापरः विष्णुः योगयुक्तः आसीत्। ततः भूः लक्ष्म्या सह विष्णोः जठरं प्राविशत्। तां निगृह्य महातेजाः देवः विष्णुः सलिलार्णवं प्रविश्य बहून् वर्षगणान् अस्वपत्।विष्णौ सुप्ते तदा ब्रह्मदेवः तं विष्णुं रुद्धस्रोतं ज्ञात्वा तस्य जठरं प्राविशत्।

ततः विष्णोः नाभ्यां हेमविभूषिते समुत्पन्ने पद्मे योगी सिसृक्षुः भूत्वा ब्रह्मदेवः निर्गम्य पृथिवीं वायुं पर्वतान् समहीरुहान् सृष्ट्वा तदनन्तरं समनुष्यसरीसृपान् प्रजाः सर्वाः जरायुजाण्डजान् सर्वान् असृजत्। तत्र भगवतः विष्णोः श्रोत्रमलात् मधुना सह कैटभः समुत्पन्नः अभवत्। तौ घोररूपौ महावीर्यौ दुरासदौ दानवौ प्रजापतिं दृष्ट्वा क्रोधाविष्टौ अभवताम्। तं प्रजापतिं दृष्ट्वा तौ महता वेगेन अधावताम्। तौ घोररूपौ दानवौ दृष्ट्वा प्रजापतिना तदा विकृतः रावः मुक्तः। तेन शब्देन भगवान् विष्णुः जागरितः भूत्वा ताभ्यां मधुकैटभाभ्यां सह युद्धे प्रवृत्तः अभवत्। अथ विष्णोः चक्रप्रहारेण तौ उभावपि दानवौ हतौ। ततः तयोः दानवयोः मेदसा सर्वा पृथिवी प्लाविता अभवत्। ततः लोकधारिणा विष्णुना पुनः सा पृथिवी विशोधिता। ततः भगवान् विष्णुः तां विशुद्धां सर्वां पृथिवीं वृक्षैः अपूरयत्। एवं पृथिव्यां विविधानि औषधानि सर्वशस्यानि च उदभवन्। तदा धरणी मेदोगन्धा अभवत् इत्यतः पृथिव्याः अपरं नाम मेदिनी इत्यनेन अभिसंज्ञिता अभवत्। तस्मात् तद् गृहं गृध्रस्य न अपितु उलूकस्य इति मे मतिः।



अयं महान् दुर्विनीतः पापात्मा गृध्रः अन्यान् पीडयति, तस्मात् परालयं हर्ता पापी गृध्रः दण्ड्यः। तदानीम् अन्तरिक्षात् अशरीरिणी प्रवोधिनी वाणी अभवत् हे राम! महर्षेः गौतमस्य तपोबलात् गृध्रोऽयं पूर्वदग्धः, अतः त्वम् एनं गृध्रं मा वधीः! पुरा ब्रह्मदत्तः इति नाम्ना एषः सत्यव्रतः शूरः आसीत्। एकदा ऋषिः गौतमः तस्य गृहम् आगत्य तव गृहे मया वर्षशतं यावत् भोक्तव्यम् इति अब्रवीत्। तदा राजा ब्रह्मदत्तः स्वयम् ऋषये पाद्यमर्घ्यं दत्त्वा भोजनार्थम् आहारम् अददात्। तस्य महात्मनः गौतमस्य तस्मिन् आहारे मांसम् आसीत् इति दृष्ट्वा ऋषिणा गौतमेन हे राजन्!त्वं गृध्रः भव इति राज्ञे ब्रह्मदत्ताय दारुणः शापः दत्तः। ततः राजा ब्रह्मदत्तः अत्यन्तं विनयेन महर्षिं गौतमम् अब्रवीत् हे धर्मज्ञ! अज्ञानात् एवम् अभवत्, अतः प्रसादं कुरु। हे महाभाग! शापस्य अन्तः क्रियताम्। ततः तदज्ञानकृतं मत्वा ऋषिः गौतमः अब्रवीत् - राज्ञाम् इक्ष्वाकूणां कुले रामो नाम महायशाः राजा उत्पत्स्यति। तेन स्पृष्टः त्वं विपापः भविता। तच्छ्रुत्वा रामेण सः पृथिवीपतिः ब्रह्मदत्तः स्पृष्टः। ततः सः गृध्ररूपं त्यक्त्वा दिव्यगन्धानुलेपनः दिव्यरूपः पुरुषः भूत्वा राघवम् अब्रवीत् हे धर्मज्ञ!

# Blood Donation Camp : राष्ट्रीयसेवायोजना, जीवनज्योति- रक्तकेन्द्रन एवं घटकम्, नागपुरम् एवं एचडीएफसीबैंक शाखा- रामटेकद्वारा रक्तदानशिविरम्



**हिमसंस्कृतवार्ताः - रामटेकम्।**

डॉ. कविकुलगुरुकालिदाससंस्कृत विश्वविद्यालयस्य राष्ट्रीयसेवायोजना, जीवनज्योतिरक्तकेन्द्रं एवं घटकम्, नागपुरम् एवं एचडीएफसीबैंकशाखायाः रामटेकस्य सहयोगेन दिसम्बर ५ दिनांके महापरिनिर्वाण दिवसस्योपलक्ष्ये विश्वविद्यालयस्य शैक्षणिकपरिसरे भव्यरक्तदानशिविरस्य आयोजनम् विहितम्।
कुलपतिः प्रो. हरेरामः त्रिपाठी तथा कुलसचिवः डा. देवानन्दः शुक्लः अस्मिन्नवसरे उपस्थितौ आस्ताम्।
प्रातः ११.३० वादने आरब्धं रक्तदानशिविरम् अपराह्ने ०५.०० वादनपर्यन्तं अचलत्। रक्तदानशिविरस्य उद्घाटनं डॉ. जयवंतः चौधरी अकरोत् । कार्यक्रमस्य अध्यक्षः निदेशकः प्रो. हरेकृष्ण अगस्ती छात्राणां कृते रक्तदानस्य महत्त्वं व्याख्याय उक्तं यत् रक्तदानं महत्त्वपूर्णं कार्यम् अस्ति यत् कोटिकोटिरोगिणां जीवनं रक्षितुं परिवर्तनं च कर्तुं सहायकं भवति। उच्यते यत् रक्तदानं सर्वोच्चम् उपायनं वर्तते यत् भवद्भिः अन्येभ्यः मनुष्येभ्यः दातुं शक्यते । अपि च कार्यक्रमस्य मुख्यातिथिः कुलपतिः छात्रान् रक्तदानार्थं प्रेरयन् स्वसम्बोधने अवदत् यत् बहवः जनाः रक्तस्य तत्कालीनाः आवश्यकतां अनुभवन्ति, रक्तदानेन वयं तेभ्यः सुलभं जीवनं दद्मः। एषा एव महती सन्तुष्टिः यत् कोऽपि अनुभवितुं शक्नोति । अस्मान् गर्वितं करोति, जीवनस्य उद्देश्यमपि दातुं शक्नोति – कस्यचित् जीवने अस्माभिः परिवर्तनं कृतम् इति साक्षात्कारः अस्माकं व्यवस्थां स्फूर्तिकरोति | शिविरे रक्तदानं कृतवद्भ्यः छात्रेभ्यः विश्वविद्यालयात् प्रमाणपत्रं तथा जीवनज्योति ब्लड सेन्टर एण्ड कम्पोनेन्स, नागपुरतः प्रमाणपत्रं, एचडीएफसी बैंक, शाखा रामटेक इत्यस्मात् निःशुल्काल्पाहारं तथा जलकूपी तथा पाथेयपुटकं च दत्तम्। विश्वविद्यालयस्य छात्राणां कर्मचारिणां च मध्ये कुलम् ८० जनाः शिबिरे रक्तदानं कृतवन्तः। उद्घाटनकार्यक्रमस्य संचालनं सहायकप्रो.सीमा गायकवाड (कार्यक्रमपदाधिकारी, राष्ट्रियसेवायोजना) इत्यनया कृतम्, धन्यवादपत्रं च प्रो.नीतीशचकोले इत्यनेन दत्तम्। सम्पूर्णं शिबिरस्य आयोजनं डा. जयवंत चौधरी (निदेशक, राष्ट्रीय सेवा योजना) इत्यस्य नेतृत्वं अभवत्।

# नवदिल्ली-रेलस्थानकस्य परिसरे नवनिर्मितस्य मार्ग-रेलयानस्य निरीक्षणं कृतवान् रेलमन्त्री अश्विनी-वैष्णवः



रेलमन्त्री अश्विनी-वैष्णवः नवदिल्ली-रेलस्थानकस्य परिसरे नवनिर्मितस्य मार्ग-रेलयानस्य निरीक्षणं कृतवान्। वार्ताहरैः सह वार्तालापं कुर्वन् श्रीवैष्णवः अवदत् यत् रेल्-यन्त्र-मोटर्-ट्राली-सौकर्यस्य आधुनिकीकरणविषये रेल-कर्मिभिः पर्यवेक्षकैः च सह विस्तृत चर्चायाः अनन्तरं निर्मितः एषः नूतनः अविष्कारः अस्ति । उन्नयनस्य विषये मन्त्रिवर्यः अवदत् यत् पूर्वं मार्गस्य रक्षणार्थं प्रयुक्तं मोटर्-ट्राली-सौविध्यं बहुप्राचीनम् आसीत्